श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वराहाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वराहाष्टकम् ॥

कमलायतनेत्राय कमलायतनोरसे।
वराहवपुषे दैत्यवराहवपुषे नमः॥ 1 ॥

वामांसभूषायितविश्वधात्री -
    वामस्तनन्यस्तकरारविन्दः।
जिघ्रन् मुखेनापि कपोलमेनां
    जीवातुरस्माकगुरोः स जीयात्॥ 2 ॥

वेदिस्तनूराहवनीयमास्यं
    बर्हींषि लोमानि जुहूश्च नासा।
शम्या च दंष्ट्राजनि यस्य यूपो
    वालो मखात्मा स पुनातु पोत्री॥ 3 ॥

पापेन दैन्येन भवाम्बुराशौ
    निपातितं मां निरवग्रहोर्मौ।
धूतारिरुद्धृत्य धरामिवोच्चैः
    कुर्यान्मुदं मे कुहनावराहः॥ 4 ॥

वेशन्तति व्रतजुषां हृदयं मुनीनां
    वेगापगाविहृतिकाननचङ्क्रमाणाम्।
मुस्तागणन्ति किल यस्य सुरारिवर्गाः
    कोलः स कोऽपि कुशलं कुरुतादजस्रम्॥ 5 ॥

कल्याणमङ्कुरति यस्य कटाक्षलेशा -
    द्यस्य प्रिया वसुमती सवनं यदङ्गम्।
अस्मद्गुरोः कुलधनं चरणौ यदीयौ
    भूयः शुभं दिशतु भूमिवराह एषः॥ **6** ॥

कल्पान्तसन्ततघनाघननिर्विघात -
    निर्घातवातरवनिष्ठुरतारधीरम्।
मायाकिटेर्बधिरितद्रुहिणश्रवस्कं
    घोणापुटीघुरघुरारसितं पुनातु॥ **7** ॥

झटिति विलुठदुर्मीचाटुवाचाटसिन्धु -
    स्फुटपटहविदस्त्रस्फोटदीप्तोटमुद्यम्।
खरखुरपुटघाताधूतखाटारिवाटः
    कपटकिटिरघौघाटोपमुच्चाटयेन्नः॥ **8** ॥

यत्कारिकादर्पणाख्यकृतिनावा भवाम्बुधिम्।
सन्तस्तरन्ति वरदगुरवे श्रीमते नमः॥ **9** ॥

॥ इति श्री वराहाष्टकं समाप्तम्॥